दिनाङ्क :-01.12.2025 प्रात: - 06:55

## अथ वार्ता:

### संसद- शीतकालीन अधिवेशन

अद्य संसदः शीतकालीन-सत्रस्य आरम्भः भवति। अस्मिन् ऊनविंशति-दिवसीयसत्रे आहत्य पञ्चदश-उपवेशनानि भविष्यन्ति। इतः पूर्वं ह्यः संसदः द्वयोः सदनयोः सुचारुरूपेण कार्यं कर्तुं सर्वकारेण नवदिल्लीनगरे सर्वदलीयसमागमः आहूतः आसीत् । रक्षामन्त्री राजनाथसिंहस्य अध्यक्षतायां षट्त्रिंशत् राजनैतिकदलानां पञ्चाशत् नेतारः उपस्थिताः आसन्। संगोष्ठ्याः नन्तरं संसदीयकार्यमन्त्री किरेन् रिजिजुः अवदत् यत् अस्मिन् सत्रे सर्वकारेण, द्वयोः सदनयोः सुचारुरूपेण कार्यं कर्तुं, सहकारप्रदानाय सर्वेभ्यः राजनैतिकदलेभ्यः आह्वानं कृतम्। अवधेयमस्ति यत्, अस्मिन् सत्रे राष्ट्रिय-राजमार्ग-विधेयकः, परमाणु-ऊर्जा-विधेयकः, उच्च-शिक्षा-आयोग-विधेयकः इत्येतैः सह त्रयोदश-विधेयकाः चर्चार्थम् अनुमोदनार्थं च उपस्थापयिष्यन्ते ।

### गीता-जयन्ती

अद्य आविश्वं अन्ताराष्ट्रिय-गीताजयन्ती-महोत्सवः आचर्यते। प्रतिवर्षं मार्गशीर्ष-मासस्य शुक्लपक्षस्य एकादशी तिथौ अयं महोत्सवः आचर्यते । अयं दिवसः तस्य क्षणस्य स्मरणं करोति यदा भगवान् श्रीकृष्णः कुरुक्षेत्रस्य युद्धक्षेत्रे भगवद्गीतायाः कालातीतशिक्षां अर्जुनाय प्रदत्तवान् । गीताजयन्ती न केवलं धार्मिकानुष्ठानस्य दिवसः, अपितु भगवता: कृष्णेन प्रदत्तस्य सार्वत्रिकप्रज्ञायाः स्मरणं अपि अस्ति, या च निरन्तरं कोटिकोटि-जनानाम् नित्यजीवने मार्गदर्शनं करोति । भगवद्गीता जीवनस्य, कर्तव्यस्य, अस्तित्वस्य च स्वरूपस्य विषये अत्यन्तं मौलिकप्रश्नानां समाधानं प्रददाति । ह्यः आकाशवाण्याः स्वस्य “मन की बात” कार्यक्रमे प्रधानमन्त्री नरेन्द्रमोदी भगवद्गीतायाः विषये वर्धमानं वैश्विकरुचिं प्रकाशितवान् । श्रीमोदी अवदत्, यत् हरियाणा-राज्यस्य कुरुक्षेत्रे सद्यः एव आयोजिते अन्ताराष्ट्रिय-गीतामहोत्सवे यूरोप-मध्य-एशिया-सहितस्य विश्वस्य, अनेकेभ्यः देशेभ्यः जनाः भागं गृहीतवन्तः।

### नड्डा-एड्स दिवस :

स्वास्थ्य एवं परिवार कल्याण मंत्री जगत प्रकाश नड्डा अद्य ऐषमः विश्व एड्स दिवसस्य राष्ट्रियस्तरस्य सम्मेलनस्य नेतृत्वं करोति । अस्य उद्देश्यं एच.आई.वी. इत्यस्य निवारणस्य, चिकित्सायाः, परिचर्यायाः, कलङ्क-निवारणस्य च राष्ट्रियप्रतिक्रियायाः उन्नतिं कर्तुं सर्वकारस्य अचल-प्रतिबद्धतायाः पुनः पुष्टिः वर्तते ।

### भारत - WSAC 2025 :

भारतेन वैश्विक-कौशलमञ्चे महत्त्वपूर्णं साधनां कृत्वा विश्वकौशल-एशिया-प्रतियोगिता विंशति-पञ्चविंशतिः इत्यस्मिन् प्रथमवारं भागं गृहीत्वा ऊनत्रिंशत्-देशैः सह स्पर्धां कृत्वा अष्टमं स्थानं प्राप्तम् । प्रतियोगितायां भारतेन पारम्परिक-प्रौद्योगिकी-सञ्चालित-कौशल-वर्गयोः एकं रजतपदकं, द्वौ कांस्यपदकौ, त्रीणि च उत्कृष्टता-पदकानि प्राप्तानि ।

### सरस खाद्य महोत्सवः

केन्द्रीय ग्रामीण विकासमन्त्री शिवराजसिंह चौहानः अद्य नव-दिल्लीनगरे ऐषमः सरस-आजीविका-खाद्य-महोत्सवस्य उद्घाटनं करिष्यति। ग्रामीणविकासमन्त्रालयेन सूचितं यत् देशस्य पञ्चविंशतिः राज्येभ्यः प्रायः त्रिशतं लक्षपति-भगिन्यः स्वसहायता-समूहानां महिलाः च महोत्सवे भागं गृहीष्यन्ति । भोजनमहोत्सवः प्रातः सार्ध-एकादश-वादनतः रात्रौ सार्ध-नव-वादन-पर्यन्तं आगन्तुकानां कृते उद्घाटितः भविष्यति । तथा अयम् उत्सवः अस्य मासस्य नवम-दिनाङ्कपर्यन्तं भविष्यति ।

## क्रिकेट - IND VS SA

एकदिवसीय-पुरुषक्रिकेट्-क्रीडायां भारतेन गतरात्रौ रांची-नगरे एकदिवसीय-क्रीडा-त्रय-श्रृङ्खलायाः उद्घाटन-क्रीडायां दक्षिण-आफ्रिका-देशं सप्तदश-धावनांकैः पराजितम् । विराट् कोहली क्रीडा-श्रेष्ठः इति निर्णीतः । एतेन विजयेन भारतं अधुना एकदिवसीय-क्रीडात्रय-श्रृङ्खलायां एकम्-शून्यम् इति अंकस्य अन्तरालेन अग्रे वर्तते ।

।।इति वार्ता:।।